# संस्कृताभिमानी स्वामिविवेकानन्दः

**जानकी शरणः***

स्वामीविवेकानन्दस्य अवतरणं भारतस्य सनातनधर्मस्य चेतिहासे सामान्यघटना नास्ति, अतस्तस्य परिचयकरणं नावश्यकम्। महापुरुषाणां वियति स्वामिविवेकानन्दः देदीप्यते इति निश्चप्रचम्। भारतस्य सीम्नः अतिक्रम्य समग्रस्य विश्वस्य कोणे कोणे वेदान्तस्य भारतीयसंस्कृतेश्व प्रचारम् अकार्षुः स्वामिपादाः। स्वामिपादानां चिन्तनं समयानुसारं, युगानुसारं चासीत्। तेषां चिन्तनं न केवलम् 'अद्य एतादृशी आवश्यकता संजाता अतः एवं व्याख्यानं क्रियते' इति दृष्ट्या आसीत्, अपि तु प्रामाणिकरीत्या, मूलभूतरीत्या तत्त्वतः एवमस्ति इति दृष्ट्या तेषां व्याख्यानानि अधुनापि विलसन्ति। स्वामिविवेकानन्दस्य जीवनं तथा सन्देशश्च अतिप्राचीनम् भारतराष्ट्रमिदं समसामयिकप्रपंचानुरूपं रूपान्तरयित्वा, स्वमूलेषु पुनः संस्थाप्य भारतराष्ट्रे तथाऽन्यत्र च कोटिशः जनानां भवितव्यानि रूपान्तरयितुं सन्मार्गे समन्वेतुं च प्रवर्तेते। हिन्दुसमाजे विवेकानन्दस्य प्रसृतिः, वैश्विकस्तरे च तेषां प्रसिद्धिः, निरन्तरं तस्य नान्मा राष्ट्रस्य प्रत्येकं भागे, प्रत्येकं नगरे, प्रत्येकं महानगरे तथा असंख्याकेषु ग्रामेशु च लक्षशः सम्पद्यमानेषु कार्यक्रमेषु संस्थासु तथा सेवासु च व्यक्तीभवति।

स्वामिविवेकानन्दः स्वीयवाण्याः प्रभावेन हिन्दुसमाजम् ऊर्जस्वीकृतवान् भारतराष्ट्रं च सबलीकृतवान् इत्येतत् इतिहासेन स्वीकृतं तथ्यमस्ति। स्वामिविवेकानन्दः स्वीयैः नितान्तगम्भीरैः विचारैः रोमांचोत्कापादकवचनैश्च सामान्यजनेषु न केवलं स्वप्रभावं अजनयत् किन्तु स अतिविशिष्टमेधाशक्तिसम्पन्नान् उत्तमोत्तमपदानि अधितिष्ठतः अत्यन्तापरिचितान् अपि प्रभावितमकरोत्। हिन्दुराष्ट्रस्यास्य सामाजिकोन्नतेः, धार्मिकोन्नतेः, राष्ट्रमिदं पुनः विश्वगुरुपदे प्रतिष्ठापयितुं च स्वामिनः आध्यात्मिकोपायाः अतीव वैज्ञानिकाः आसन्। अस्य राष्ट्रस्य सर्वांगीणविकासाय स्वामिना प्रदत्तः आध्यात्मिकौषधिः साक्षात् अस्य राष्ट्रस्य आत्मनि प्रविश्य, सामाजिकदुर्स्थितिरूपो यो व्याधिः आसीत्, तस्य व्याधेः समूलात् प्रतिकारमकरोत्। तस्य सन्देशः हिन्दुधर्मस्य विभिन्नेषु विभागेषु, पाश्चात्त्यदेशेषु च निर्विघ्नतया प्रसारितः प्रतिष्ठापितश्चाभवत्।

हिन्दुधर्मस्य पुनरुज्जागरणविषये स्वामिविवेकानन्दात् प्रागपि बहवो हि मनीषिणः प्रयत्नमकार्षुः। तथापि तेषां मनीषिणां हिन्दुधर्मविशये या नवचेतना स्वामिविवेकानन्दस्य समये दृग्गोचरा भवति, तथा तेषां मनीषिणां समये तत्र न दृश्यते स्म। तत्र तिं कारणमिति विचारे सति एवमवगम्यते यत् स्वामिविवेकानन्देन हिन्दुधर्मे नवचेतनायाः यः संचारः कृतः यच्च पुनरुज्जागरणं कृतम्, तस्य कारणभूता आसीत्-तेषां समन्वयदृष्टिः। तैः सामाजिको वा धार्मिको वा राजनैतिको वा विषयः स्वतन्त्रतया न स्वीकृतः, किन्तु तत्स्थाने तैः आध्यामिकतायाः विमर्शेन सर्वविधसमन्वयं

*असिस्टेंट प्रोफेसर (वेदान्तः) श्रीसोमनाथसंस्कृतविश्वविद्यालयः वेरावल–362 266 (गुजरातम्)



कृत्वा अद्वितीयब्रह्मविषये व्याख्यातम्। स्वामिना उपनिषदः एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा[2] अनुसारेण उपनिषदां भगवद्गीतायाः च व्याख्यानं कृत्वा स्वानुभूत्यर्थम् अनुभवार्थं च सर्वेभ्यः अवसरः प्रदत्तः। एतादृशं यत् पुनरुज्जागरणम् अभवत्, तत् एकं संघटितमाकारं स्वीकृतवत्। एतादृभापुनरुज्जागरणस्य आधारः आसीत् - संस्कृतसाहित्यम्, तदन्तर्गतज्ञानं च।

स्वामिविवेकानन्दस्य लेखनेषु भाषणेषु पत्रेषु च संस्कृतस्य महत्त्वं दरीदृश्यते। स्वामिपादानां साहित्यस्य अध्ययनाय इदं ज्ञायते यत्तेशां संस्कृतसाहित्ये, संस्कृतग्रन्थेषु च अप्रतिहतगतिरासीत्। भारतीयतायाः पुनरुज्जागरणे स्वामिपादानां प्रत्येकं भाषणं वा लेखनं वा उद्बोधनं वा संस्कृतसाहित्याधारितमासीत्। तत्र आधारभूताः संस्कृतग्रन्थास्सन्ति - वेदाः, उपनिषदः, भगवद्गीता, महाकाव्यानि, स्तोत्रसाहित्यम्, सुभाषितसाहित्यम् इत्याद्याः। भारतीयतायाः पुनरुज्जागरणे स्वामिपादैः प्रतिपदं संस्कृतसाहित्ये विद्यमानस्य ज्ञानराशेः प्रतिपदमुदाहरणं दत्त्वा स्वीयविचाराः प्रमाणीकृताः। उदाहरणार्थं प्रसंगमेकं स्वीकुर्मः-स्वामिपादेन विश्वधर्मसंसदि प्रदत्ते ऐतिहासिकभाषणे अपि, यस्य कृते आयोजकैः पंचनिमेषा निर्धारिताः आसन्, तत्रापि स्वामिना संस्कृतसाहित्यस्य उद्धरणद्वयं दत्तम्। तत्र प्रथमं तावत् शिवमहिम्नस्तोत्रात्

–'**रुचीनां वैचित्र्यात् ऋजुकुटिलनानापथजुषां नृणामेको गम्यः त्वमसि पयसामर्णव इव**' इति। अन्यच्च '**ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।मम वर्तमानुवर्तन्ते मनुष्याः पार्थः सर्वशः**' इति भगवद्गीतायाः[3] वचनमासीत्।स्वामिनः "arise, awake and stop not till the goal is reached" इति सुप्रसिद्धो नादघोषेऽपि कठोनिषदः यमनचिकेतयोः संवादाधारितमासीत्। किंच यमनचिकेतयोः एतत् रोमांचकम् आख्यानं स्वामिपादेन भारतीयतायाः पुनरुज्जागरणे स्वीयभाषणेषु भूयो भूयः स्मारितमासीत्।

**स्वामिविवेकानन्दस्य संस्कृतविषयकविचाराः –** प्रत्येकं भारतीयजनेन संस्कृतस्य अध्ययनं करणीयम् इति स्वामिपादानां मतमासीत्। स्वामिविवेकानन्दस्य संस्कृत भाषा साहित्यविचाराः तेषां भाषणेषु यत्र तत्र दरीदृश्यन्ते। विशिष्य च पाश्चात्यजगतः यात्रानन्तरं भारतराष्ट्रस्य विविधस्थानेषु दत्तेषु भाषणेषु तेषां संस्कृतभाषासाहित्य-विषयकविचारा दृग्गोचरा भवन्ति। स्वामिपादेन संस्कृतस्याध्ययनाय असकृद् उक्तमासीत् स्वीयपत्रेषु। तच्चाध्ययनं मुख्यविषयत्वेन वा अन्यैः मुख्यविषयैः सह भवतु। स्वामिना एतदपि स्पष्टरूपेण बहुवारम् उद्घोषितमासीत् यत् भारतराष्ट्रं पुनः विश्वगुरुपदवीं केवलं संस्कृतेन प्राप्तुं भाक्नोति, नान्येन उपायेन।[4]

स्वामिविवेकानन्देन 'भारतस्य भविष्यम्' इत्यस्मिन् विषये मद्रासनगरे प्रदत्ते भाषणे[5], संस्कृतसाहित्ये यो ज्ञानराशिः निहितमस्ति, तद्विषये उक्तम्- 'यदा खलु देशस्यास्य सामाजिकदृष्ट्या अन्तिमान्तिमजनः संस्कृतं यस्मिन् दिने अधीते, तस्मिन् दिने भारतस्य सर्वविधसमस्यायाः स्वयमेव तिरोहिता भविष्यन्ति। सर्वप्रथमं मम उद्देश्यम् एतदस्ति यत् संस्कृतसाहित्ये आध्यात्मिकतायाः यानि रत्नानि निगूहितानि सन्ति, यानि च रत्नानि ग्रन्थेषु केषुचित् पुरुषशेषु च सीमितानि अभवन्, तानि तस्मात् स्थानात् बहिरानयनं मम प्रथमं लक्ष्यमस्ति। न केवलं एतावदेव, अपि तु तत्र यो ज्ञानकोषो

यस्यां भाषायां रक्षितोऽस्ति, तस्याः भाषायाः अपि सर्वत्र प्रचारो भवेत्। संस्कृतभाषा सर्वजनस्य भाषा भवेत्, भवतु नाम सः संस्कृतं जानीयात् वा न' इति।

स्वामिविवेकानन्देन स्वीयोद्देश्यपूर्तये यत् काठिन्यमनुभूतमासीत् तद्विशयेऽपि स्वामिपादैः विमर्शः कृतः। तस्य निष्कर्ष आसीत्-जनेषु संस्कृतभाषायाः अज्ञानम्। एतादृशं काठिन्यम् अपसारयितुं स्वामिपादैः यः प्रायोगिकः उपायः उक्तः, तदत्यन्तः प्रासंगिकः आसीत्। स्वामिपादाः वदन्ति-'अस्माकं उद्देश्यपूर्तये यत् काठिन्यमस्ति, तदस्ति संस्कृतभाषा, अस्माकं यशप्रदात्री गौरववर्धिनी भाषा-संस्कृतभाषा। एतत् काठिन्यं तावत्पर्यन्तनं न गच्छति यावत्पर्यन्तं समग्रराष्ट्रमिदं संस्कृतविदुषां राष्ट्रं न भवेत्। भवन्तः एतत् काठिन्यमनुभवितुं भाक्नुवन्ति यदाऽहं वदामि यदहं सम्पूर्णे जीवने अस्या भाषायाः अध्ययनमकार्षम् तथापि प्रत्येकम् अपि ग्रन्थः मम कृते नूतनायते। तर्हि येषां समीपे इमां संस्कृतभाषाम् अध्येतुं ईषदपि समयः नास्ति, तेषां कृते कियत्काठिन्यमस्ति इति भवन्तः अवगन्तुं भाक्नुवन्ति। अतः अस्यां भाषायां यो ज्ञानराशिः निहितः अस्ति तत्तेभ्यः तेषां भाषायां दातव्यः, किन्त तत्समयेऽपि संस्कृतभाषायाः अध्ययनं मातृभाषया सह भवेदिति व्यवस्थाऽपि करणीया। यतो हि अस्याः भाषायाः एकैकोऽपि शब्दः अस्मान् सर्वान् गौरवं, शक्तिं, प्रतिष्ठां च ददाति।' एतदस्ति संस्कृतस्य वैशिष्ट्यं यद्विवेकानन्दसदृशाः मेधाविनः वदन्ति यत् प्रत्येकसंस्कृतग्रन्थः नूतनायते। संस्कृते तादृशं वैचित्र्यं, वैशद्यं, वैशाल्यं, वैपुल्यं च वर्तते यत् येन केनाऽपि चुलकीकृत्य संस्कृतम् आस्वादयितुं, स्वायत्तीकृतुं न शक्यते।

स्वामिविवेकानन्दस्य एतदुद्धरणं स्पष्टयति यद् स्वामिना आजीवनं न केवलं संस्कृतमधीतम्, अपितु 'एकः शब्दः सम्यक्ज्ञातःशास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुक् भवति[6]' इति महाभाष्योक्तरीत्या संस्कृतं बलमाददाति, एकोऽपि संस्कृतशब्दः आत्मनि बलं जनयति तथा इतरभाषास्थशब्दाः जनयितुं न प्रभवन्ति। स्वामिना स्वकीयेषु भाषणेसु एतदपि निगदितमासीत् यत् रामानुज-कबीरदास-चैतन्यमहाप्रभु-रामानन्दाचार्याः इत्याद्याः सर्वे एते महापुरुषाः समाजोद्धरणार्थं बहुविधं प्रयासमकार्षुः। समसमाजनिर्माणार्थं तेषां प्रयासः अत्यन्तसंस्तुत्यः आसीत्। तेषां समग्रचिन्तनं निम्नजातीयजनानाम् उन्नतिविषये आसीत्, परन्तु यावदेव तेषाम् अवतारसमाप्तिर्जाता, तदनन्तरं तत्र शैथिल्यं कथमागतम्? केन कारणेन तत्र यथापूर्वं व्यवस्था संजाता? किमर्थं तेषां व्यवसायः शाश्वतिकः न सम्पन्नः? इति विचारणीयं वर्तते। तत्र किं कारणमित्यत्र स्वामिविवेकानन्दः कथयति यत् ते समाजम् उद्धृतवन्तः इति तु सत्यम्, किन्तु संस्कृतं न सर्वर्धितवन्तः इत्यपि सत्यम्। तेन कारणेन वयं प्रारम्भदशायां पुनः आगताः। यावदेव किंचिद् उद्धारो जातः, ततोऽधिकतरं निपतनमासीत्। यतो हि संस्कृतमन्तरा आन्तरसंस्काराणां जागरणं न जातम् आसीत्। तच्च जागरणं केवलं संस्कृतमाध्यमेन एवं भवितुमर्हतीति तेषाम् आशयः आसीत्। अतः संस्कृतं प्रत्येकं जनेन अध्येतव्यमिति स्वामिपादानां विचारः आसीत्। अपि च स्वामिपादाः कथयन्ति यत् भगवान्बुद्धोऽपि संस्कृतभाषायाः अध्ययनमवरुद्ध्य किंचित् प्रमादमकार्षीत्। भगवान्बुद्धः तत्समये तात्कालिकः परिणामः अपेक्षते स्म, अतः तेन तत्समये संस्कृतग्रन्थान् अनूद्य जनसामान्यस्य भाषायां पालिभाषायां स्वीयः उपदेशः प्रदत्तः। एतेन जनाः बुद्धस्य विचारान् अवगन्तुमशकन्, तस्य



उपदेशाः सर्वत्र प्रसारिताः अभवन्। भगवतः बुद्धस्य एतेन प्रयत्नेन ज्ञानं तु आगतम्, किन्तु तत्र गौरवं नासीत्.... प्रतिष्ठा नासीत्... संस्कृतिः नासीत्...। जनानां भाषायां प्रदत्तं भाषणं ज्ञानं तु ददाति किं तु तत् सूचनामात्रं भवति। किन्तु ततोऽप्यधिकमपेक्षते... तदस्ति.. संस्कृतं संस्कृतिश्च।

स्वामिना निम्नजातीयजनान् पुनः प्रतिष्ठापयितुम्, सर्वासां समस्यानां च एकः रामबाणः उपायः दर्शितः आसीत्, स चास्ति - संस्कृताध्ययनम्। स्वामिपादेन जातिव्यवस्थायाः समीकरणमपि संस्कृताध्ययनेन एव भवति इत्यपि निगदितमासीत्। यथा तैः मद्रानगरे प्रदत्ते स्वागतभाषणे उक्तम्-'ये जनाः निम्नजातिभिः सम्बद्धाः, तान् अहं वक्तुमिच्छामि यत् संस्कृतस्य अध्ययनमेव तेषम् उन्नतिसाधनस्य उपायोऽस्ति। यत् संस्कृताध्ययनम् उच्चजातीयानां बलमस्ति, तस्याध्ययनं भवद्भिः क्रियते चेत् भवन्तः यदिच्छन्ति, तत् प्राप्तुं भाक्नुवन्ति' इति। स्वामिना ब्राह्मणेभ्यः निम्नजातीयजनेभ्यः उभयोः कृते पारस्परिकसहयोगेन संस्कृताध्ययनाध्यापनस्य परामर्शः दत्तः आसीत्।

स्वामिपादाः कथयन्ति यत्[7] - 'अस्माकं पूर्वजैः यः अमूल्यनिधिः अस्माकं कृते संरक्षितोऽस्ति, यश्च निधिः संस्कृतसाहित्ये निगूहितमस्मि, तत् बहिरानीय सर्वेभ्यः दातव्यः। एतत्कार्यं ब्राह्मणेभ्यः एव सर्वप्रथमं करणीयम्। बंगाले एकः प्राचीनः विश्वासोऽस्ति यत् कश्चन सर्पः कमपि दंशति चेत् स सर्प एव यदि पुनः दंशितपुरुषात् विषं चूसति चेत् सः दंशितपुरुषः अवश्यं जीवति। तर्हि ब्राह्मणेभ्यः अस्माकं व्यवस्थायां यः दोषः आगतः, तदवश्यमेव परिहरणीयः। ब्राह्मणेतरजातीः प्रति अहं कथयामि यत् तिष्ठन्तु। त्वरा मास्तु। ब्राह्मणैः सह योद्धुं सर्वदा सिद्धाः मा भवन्तु। यतो हि यथाऽहं पश्यामि, भवन्तः सर्वे स्वीयन्यूवताद्वारा एव पीडितास्सन्ति। आध्यामिकजीवनं संस्कृताध्ययनं च तिरस्कर्तुं भवन्तः कः अवादीत् ? सहस्रेभ्यो वर्षेभ्यो भवन्तः किं कुर्वन्तस्सन्ति? भवतु किमर्थम् औदासीन्यम् आगतम्? इदानीं भवन्तः किमर्थं कुप्यन्ति यत् कस्यचिद् समीपे भवदपेक्षया विकसिता बुद्धिः अस्ति, अधिका ऊर्जा अस्ति, भवदपेक्षया अधिकाः अवसराः सन्ति। भवन्तः स्वकीयाः सर्वाः ऊर्जाः निरर्थकविमर्शेषु व्यर्थीकरणपेक्षया, समाचारपत्रेषु कलहापेक्षया, यत् पापमस्ति, भवन्तः सर्वे स्वीयशक्तीः तां संस्कृतिम् अर्जयितुं किमर्थं न नियोजयन्ति, या संस्कृतिः ब्राह्मणनां समीपेऽस्ति। भवन्तः संस्कृतविद्वांसः किमर्थं न भवन्ति? भवन्तः किमर्थं संस्कृताध्यापनाय अवधानं न ददति? एतदेव प्रश्नोऽस्ति। यस्मिन् क्षणे भवन्तः एतत् कार्यं करिष्यन्ति, तस्मिन् क्षणे एव भवन्तः तत्समानाः भविश्यन्ति। एतदेव भारतस्य शक्तेः रहस्यमस्ति।' एवंरूपेण स्वामिना न केवलं भारतस्य समस्यायानां निरूपणं कृतम् अपि तु तासां समस्यानां निवारणाय कः उपायः अस्ति, केन वा उपायेन भारतराष्ट्रं विश्वगुरुपदवीं लभेत इति विषये अपि समाधानं दत्तमासीत्।

### स्वामिना संस्कृतसंवर्धनाय कृतं कार्यम् -

एतावता प्रबन्धेन स्वामिपादस्य संस्कृतविषयकविचाराः, चिन्तनं, दृष्टिश्चात्र प्रस्तुता। इदानीं सैद्धान्तिकरूपेण स्वामिपादेन संस्कृतविषयकं यच्चिन्तनं कृतम्, तस्य प्रायोगिकपक्षविषयेऽपि ईषत् प्रस्तूयते। एतद्विष्ये जनाः कदाचिदधिकं न जानीयुः, तेषां कृते कदाचित् आश्चर्यास्यापि विषयोऽयम्। स्वामिविवेकानन्देन बहुत्र प्रदत्तैः स्वभाषणैः एतज्ज्ञायते यत् स्वामिपादेन आजीवनं संस्कृतस्य अध्ययनं कृतमासीत्। किंच स्वामिपादाः प्रतिदिनं होराद्वयं स्वशिष्येभ्यः अनुयायिवर्गेभ्यश्च संस्कृतं पाठयन्ति स्म।

यस्मिन् दिने स्वामिविवेकानन्दः महासमाधिमाप्नोत्, तस्मिन् दिनेऽपि स्वामिपादेन निर्धारितहोराद्वयापेक्षया होरात्रयपर्यन्तं स्वशिष्येभ्यो ब्रह्मचारिभ्यश्च संस्कृतमध्यापितमासीत्। स्वामिनः अध्यापने विशेष्य पाणिनीयव्याकरणं वेदान्तग्रन्थाश्च भवन्ति स्म। आश्रमजनैः ब्रह्मचारिभिश्च सह स्वामिपादाः संस्कृतेन भाशन्ते स्मे। स्वामिपादेन रचितानि बहूनि संस्कृतपद्यान्यपि तेषां साहित्ये दृभयन्ते। न केवलमेतावदेव अपि तु स्वामिपादाः स्वपत्रेश्वपि संस्कृतं व्यवहरन्ति स्म। कदाचित् सम्पूर्णं पत्रं संस्कृते भवति स्म, कदाचित् अर्धं, कदाचिच्च संस्कृतवाक्यैः पूरितं भवति स्म। स्वामिपादाः अन्यानपि स्वीयपत्रमाध्यमेन संस्कृताध्ययनाध्यापनाय प्रेरयन्ति स्म।

स्वामिपादैः लिखितेषु पत्रेषु कानिचन पत्राणि सम्पूर्णतया संस्कृतभाषायां लिखितानि सन्ति।[८] पत्राणामेतेषामध्ययेन ज्ञायते यत् स्वामिपादां संस्कृतभाषायाम् अप्रतिहतगतिरासीत्। तत्र संस्कृतपत्रेषुशाब्दविन्यासः, अर्थगाम्भीर्यं, पदलालित्यं च तथाविधमस्ति, यत् संस्कृतसाहित्यस्य अत्यन्तोत्तमासु कृतिसु दृश्यते। यथा पतंजलिमुनिप्रणीते व्याकरणमहाभाष्ये, भगवच्छंकराचार्यप्रणीते शारीरकभाष्ये, वाचस्पतिमिश्रप्रणीते भामतीव्याख्याने च। उदाहरणरूपेण स्वामिपादैः संस्कृतभाषायां लिखितेषु पत्रेषु कानिचन पत्राण्यत्र प्रस्तूयन्ते -

**(१)शरतचन्द्रचक्रवर्तिमहाभागाय लिखितं पत्रम्**[९]

Daarjeeling, 19th March, 1897

ओम् नमो भगवते रामकृष्णाय

शुभमस्तु ! आशीर्वादप्रेमालिङ्गनपूर्वकमिदं भवतु तव प्रीतये। पांचभौतिकं मे पिंजरमधुना किंचित् सुस्थतरम्। अचलगुरोर्हिममण्डितशिखराणि। पुनरुज्जीवयन्ति मृतपायानपि जनानिति मन्ये। श्रमबाधामपि कथंचित् दूरीभूतेत्यनुभवामि। यत्ते हृदयोद्वेगकरं मुमुक्षुत्वं लिपिभङ्गया व्यंजितं तन्मया अनुभूतं पूर्वम्। तदेव शाश्वते ब्रह्मणि मनः समाधातु प्रसर्ति। 'नान्यः पन्था विद्यतेऽयनाय।' ज्वलतु सा भावना अधिकमधिकं यावन्नाधिगत एकान्तक्षयः कृताकृतानाम्। तदनु सहसैव ब्रह्मप्रकाशः सहसमस्तविषयप्रध्वंसेन। आगामिनी सा जीवन्मुक्तिस्तव हिताय तवानुरागदाढ्र्येणैवानुमेया। याचे पुनस्तं लोकगुरुं महासमन्वयाचार्य श्री १०८ रामकृष्णम् आविर्भवितुं तव हृदयोद्देशे येन वै कृताकृतार्थस्तवम् आविष्कृतमहाशौर्यः लोकान् समुद्धर्तुं महामोहसागरात् सम्यक् यतिष्यसे। भव चिराधिष्ठित ओजसि। वीराणामेव करतलगता मुक्तिः न कापुरुषाणाम्। हे वीरा, बद्धपरिकरा भवत, सम्मुखे शत्रवः महामोहरूपाः। 'श्रेयांसि बहुविघ्नानि' इति निष्चितेऽपि समधिकतरं कुरुत यत्नम्। पश्यत इमान् लोकान् मोहग्राहग्रस्तान्।शृणुत अहो तेषां हृदयभेदकरं कारुण्यपूर्णं शोकनादम्। अग्रगा भवत, अग्रगा, हे वीरा, मोचयितुं पाशं बद्धानां, श्लथयितुं क्लेशभारं दीनानां, द्योतयितुं हृदयान्धकूपम् अज्ञानम्। अभीरभीरिति घोषयति वेदान्तडिण्डिमः। भूयात् स भेदाय हृदयग्रन्थेः सर्वेषां जगन्निवासिनामिति।

तवैकान्तशुभभावुकः विवेकानन्दः।

(2) Almora, 1st June, 1987.[10] अल्मोडा।



**कल्याणवरेशु -**

अवगमं कुशलं तत्रत्यानां वार्तां च सविशेषां तव पत्रिकायाम्। ममापि विशेषोस्ति शरीरस्य, शेषो ज्ञातव्यो भिशक्प्रवरस्य शशिभूषणस्य सकाशात्। ब्रह्मानन्देन संस्कृतया एव रीत्या चलत्वधुना शिक्षा, यदि पश्चात्परिवर्तनमर्हेत्तदपि कारयेत्। सर्वेषां सम्मतिं गृहीत्वा तु करणीयमिति न विस्मर्तव्यम्।

अहमधुना अल्मोडानगरस्य किंचिदुत्तरं कस्यचिद्वणिज उपवनोपदेशे निवसामि। सम्मुखे हिमशिखराणि हिमालयस्य प्रतिफलितदिवाकरकरैः पिण्डीकृतरजतानि इव भान्ति प्रीणयन्ति च। अव्याहतवायुसेवनेन, मितेन भोजनेन, समधिकव्यायामसेवया च सुदृढं सुस्थं च मे शरीरम्। योगानन्दः खलु समधिकमस्वस्थ इति शृणोमि, आमन्त्रयामि तमागन्तुमत्रैव। बिभेत्यसौ पुनः पार्वत्याज्जलाद्वयोश्च। 'उषित्वा कतिपयदिवसान्यत्रोपवने यदि न तावद्विशेषो व्याधेर्गच्छ त्वं कलिकाताम्' इत्यहमद्य तमलिखम्। यथाभिरुचि करिष्यति।

अच्युतानन्दः प्रतिदिनं सयाह्ने अलमोडानगर्यां गीताशास्त्रपाठं जनानहूय करोति। बहूनां नगरवासिनां स्कन्धावारसैन्यानां च समागमोऽस्ति तत्र प्रत्यहम् सर्वानसौ प्रीणाति चेति शृणोमि। 'यावानर्थ' इत्यादि श्लोकस्य यो व्यंग्यार्थस्त्वया लिखितो नासौ मन्यते समीचीनाः। 'सति जलप्लाविते उदपाने नास्ति अर्थः प्रयोजनम्' इत्यसावर्थः। विषमोऽयमुपन्यासः, किं संप्लुतोदके सति जीवानां तृष्णा विलुप्ता भवति।

यद्येवं भवेत्प्राकृतिको नियमः जलप्लाविते भूतले सति जलपानं निरर्थकं केनचिदपि वायुमार्गेणाथवान्येन केनापि गूढेनोपायेन जीवानां तृष्णानिवारणं स्यात्, तदासावपूर्वोऽर्थः सार्थको भवितुमर्हेन्नान्यथा।

शंकर एवावलम्बनीयः।

इयमपि भवितुमर्हति -

सर्वतः संप्लुतोदकेऽपि भूतले यावानुदपाने अथः तृष्णातुराणां (अल्पमात्र जलमालं भवेदित्यर्थः), - 'आस्तां तावज्जलराशिः, मम प्रयोजनम् स्वल्पेऽपि जले सिद्ध्यति' - एवं विजानतो ब्राह्मणस्य सर्वेशु वेदेशु अर्थः प्रयोजनम्। यथा संप्लुतोदके पानमात्रप्रयोजनम् तथा सर्वेषु वेदेषु अर्थः प्रयोजनम्।

**इयमपि व्याख्या अधिकतरं सन्निधिमापन्ना ग्रन्थकाराभिप्रायस्य -**

उपप्लाविते‌ऽपि भूतले, पानाय उपादेयं पानाय हितं जलमेव अन्विध्यन्ति लोका नान्यत्। नानाविधानि जलानि सन्ति भिन्नगुणधर्माणि, उपप्लावितेऽपि भूमेस्तारतम्यात्। एवं विजानन् ब्राह्मणोऽपि विविधज्ञानोपप्लाविते वेदाख्ये शब्दसमुद्रे संसारतृष्णानिवाराणर्थं तदेव गृह्णीयात् यदलं भवति निःश्रेयसाय। ब्रह्मज्ञानं हि तत्।

इति भां साशीर्वादं विवेकानन्दस्य।

### (३) शरतचन्द्रमहाभागाय लिखितं पत्रम्[११]

Almora, 3rd July, 1897 अल्मोडा।

ओम् नमो भगवते रामकृष्णाय

यस्य वीर्यण कृतिनो वयं च भुवनानि च।

रामकृष्णं सदा वन्दे शर्वं स्वतन्त्रमीश्वरम्।।

‘प्रभवति भगवान् विधि ‘रित्यागमिनः अप्रयोगनिपुणाः प्रयोगनिपुणाश्च पौरुषं बहुमन्यमानाः। तयोः पौरुषेयापौरुषेय प्रतिकारबलयोः विवेकाग्रहनिबन्धनः कलह इति मत्वा यतस्वायुष्मन् शरच्चन्द्र आक्रमितुम् ज्ञानगिरिगुरोर्गरिष्ठं शिखरम्।

यदुक्तं ‘तत्त्वनिकषाग्रावा विपदिति’ उच्येत तदपि शतशः ‘तत्त्वमसि’ तत्त्वाधिकारे। इदमेव तन्निदानं वैराग्यरुजः। धन्यं कस्यापि जीवनं तल्लक्षणाक्रान्तस्य। अरोचिष्णु अपि निर्दिशामि पदं प्राचीनं - ‘कालः कश्चित् प्रतीक्ष्यताम्’ इति। समारूढक्षेपणीक्षेपणश्रमः विश्राम्यतां तन्निर्भरः। पूर्वाहितो वेगः पारं नेष्यति नावम्। तदेवोक्तं - ‘तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति’, ‘न कर्मणा न प्रजया धनेन त्योगेनैके अमृतत्वमानशुः’ इत्यत्र त्यागेन वैराग्यमेव लक्ष्यते। तद्वैराग्यं वस्तुशून्यं वस्तुभूतं वा। प्रथमं यदि न तत्र यतेन कोऽपि कीटभक्षितमष्तिकेन विना, यद्यपरं, तदेदम् आपतति-त्यागः मनसः संकोचनम् अन्यस्मात् वस्तुनः पिण्डिकरण, च ईश्वते वा आत्मनि। सर्वेश्वरस्तु व्यक्तिविशेषो भवितुं नार्हति, समष्टिरित्येव ग्रहणीयम्। आत्मेति वैराग्यवतो जीवात्मा इति नापद्यते, परन्तु सर्वगः सर्वान्तर्यामी सर्वस्यात्मरूपेणावस्थितः सर्वेश्वर एव लक्ष्यीकृतः। स तु समष्टिरूपेण सर्वेषां प्रत्यक्षः। एवं सति जीवेश्वरयोः स्वरूपतः अभेदभावात् तयोः सेवाप्रेमरूपकर्मणोरभेदः। अयमेव विशेषः - जीवे जीवबुद्ध्या या सेवा समर्पिता स दया, न प्रेम, यदात्मबुद्ध्या जीवः सेव्यते, तत् प्रेम। आत्मने हि प्रेमास्पदत्वं श्रुतिस्मृतिप्रत्यक्षप्रसिद्धत्वात् युक्तमेव यदवादीत् भगवान् चैतन्यः - प्रेम ईश्वरे, दया जीवे इति। द्वैतवादित्वात् तत्र भगवतः सिद्धान्तः जीवेश्वरयोर्भेदविज्ञापकः समीचीनः। अस्माकम् अद्वैतपराणां जीवबुद्धिर्बन्धनाय इति। तदस्माकं प्रेम एव शरणं, न दया। जीवे प्रयुक्तः दया शब्दोऽपि साहसिकजल्पित इति मन्यामहे। वयं न दयामहे, अपि तु सेवामहे, नानुकम्पानुभूतिरस्माकम्, अपि तु प्रेमानुभवः स्वानुभवः सर्वस्मिन्। सैव सर्ववैषम्यसाम्यकरी भवव्याधिनीरूजकरी प्रपश्चावश्यम्भाव्यत्रितापहरणकरी सर्ववस्तुस्वरूपप्रकाशकरी मायाध्वान्तविध्वंसकरी आब्रह्मस्तम्बपर्यन्तस्वात्मरूपप्रकटनकरी प्रेमानुभूतिवैराग्यरूपा भवतु ते शर्मणे शर्मन्।

इत्यनुदिवसं प्रार्थयति त्वयि धृतचिरप्रेमबन्धः

विवेकानन्दः।

**उपसंहारः -**

एवं निष्कर्षरूपेण वयं वक्तुं शक्नुमः यत स्वामिपादाः संस्कृतवाङ्मयस्य साक्षात् मूर्तावताररूपेण आसन्। भारतीयतायाः पुनरुज्जागरणे स्वामिपादानां यद्बलमासीत् तद्बलं संस्कृतस्य आसीत्, संस्कृतवाङ्मयस्य आसीत्। संस्कृतवाङ्मये जीवननिर्वाहकश्रेष्ठतत्त्वानि निगूढितानी सन्ति



तेषां बलमासीत्। स्वामिचरणैः भूयो भूयः संस्कृतविषयकविचाराः एव स्वभाषणेषु उक्त्वा स्वीयया औजस्विवाण्या विश्वस्य कोणे कोणे प्रसारिताः, येन च भारतीयतायाः पुनरुज्जागरणे भारतराष्ट्रमिदं विश्वगुरुपदवीमवाप्तुं प्रयत्नशालि वर्तते।

## (Footnotes)

१ पत्रमिदं ‘संस्कृत-अकादमी-चण्डीगढ’ एवं संस्कृतविभागः पंजाबविश्वविद्यालयः’ इत्येताभ्याम् आयोजितायां दिनद्वयव्यापिन्यां (१६-१७ नवम्बर २०१३)राष्ट्रियसंगो□ठ्या पठितम्।

२ छान्दोग्योपनिषत्, ६-१-२

३ भगवद्गीता, ४-११

४ स्वामिपादाना एतादृशविचाराः “Lectures from Colombo to Almora“ इति पुस्तके संग्रहीताः सन्ति।

५ ‘Complete Works of Swami Vivekananda’,Vol. 5, Page 391.

६ महाभाष्यम्, ६.१.४ पृ. ८४

७ ‘Complete Works of Swami Vivekananda’, Vol. 4, Page 165.

८ एतानि पत्राणि ‘Complete Works of SwamiVivekananda ‘इत्यत्र प्रकाशितानि सन्ति।

९ ‘Complete Works of Swami Vivekananda’, vol. 7, Page 308.

१० ‘Complete Works of Swami Vivekananda’,vol. 6, Page 435.

११ ‘Complete Works of Swami Vivekananda’,vol. 5, Page 166.

******